श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीदेवीभागवते महापुराणे दशमस्कन्धे

# ॥ श्री दशावतारस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री दशावतारस्तोत्रम् ॥

देवाः ऊचुः

जय विष्णो रमेशाऽद्य महापुरुष पूर्वज।
दैत्यारे कामजनक सर्वकामफलप्रद ॥ 1 ॥

महावराह गोविन्द महायज्ञस्वरूपक।
महाविष्णो ध्रुवेशाऽऽद्य जगदुत्पत्तिकारण ॥ 2 ॥

मत्स्यावतारे वेदानामुद्धाराधाररूपक।
सत्यव्रत धराधीश मत्स्यरूपाय ते नमः ॥ 3 ॥

जयाऽकूपार दैत्यारे सुरकार्यसमर्पक।
अमृताप्तिकरेशान कूर्मरूपाय ते नमः ॥ 4 ॥

जयाऽऽदिदैत्यनाशार्थमादिसूकररूपधृक्।
मह्युद्धारकृतोद्योगकोलरूपाय ते नमः ॥ 5 ॥

नारसिंहंवपुः कृत्वा महादैत्यं ददार यः।
करजैर्वरदृप्ताङ्गं तस्मै नृहरये नमः ॥ 6 ॥

वामनं रूपमास्थाय त्रैलोक्यैश्वर्यमोहितम्।
बलिं सञ्छलयामास तस्मै वामनरूपिणे ॥ 7 ॥

दुष्टक्षत्रविनाशाय सहस्रकरशत्रवे।
रेणुकागर्भजाताय जामदग्न्याय ते नमः ॥ 8 ॥

दुष्टराक्षसपौलस्त्यशिरश्छेदपटीयसे।
श्रीमद्दाशरथे तुभ्यं नमोऽनन्तक्रमाय च ॥ **9** ॥

कंसदुर्योधनाद्यैश्च दैत्यैः पृथ्वीशलाञ्छिनैः।
भाराक्रान्तां महीं योऽसावुज्जहार महाविभुः ॥ **10** ॥

धर्मं संस्थापयामास पापं कृत्वा सुदूरतः।
तस्मै कृष्णाय देवाय नमोऽस्तु बहुधा विभो ॥ **11** ॥

दुष्टयज्ञविघाताय पशुहिंसानिवृत्तये।
बौद्धरूपं दधौ योऽसौ तस्मै देवाय ते नमः ॥ **12** ॥

म्लेच्छप्रायेऽखिले लोके दुष्टराजन्यपीडिते।
कल्किरूपं समादध्यौ देवदेवाय ते नमः ॥ **13** ॥

दशावतारास्ते देव भक्तानां रक्षणाय वै।
दुष्टदैत्यविघाताय तस्मात्त्वं सर्वदुःखहृत् ॥ **14** ॥

जय भक्तार्तिनाशाय धृतं नारीजलात्मसु।
रूपं येन त्वया देव कोऽन्यस्त्वत्तो दयानिधिः ॥ **15** ॥

इत्येवं देवदेवेशं स्तुत्वा श्रीपीतवाससम्।
प्रणेमुर्भक्तिसहिताः साष्टाङ्गं विबुधर्षभाः ॥ **16** ॥

॥ इति श्री दशावतारस्तोत्रं समाप्तम् ॥